Acc. No. 1965

1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीमतेरामानुजायनमः ॥ श्रीमत्त्रय्यंतसिद्धांतगुरुपुत्रेणवर्ण्यते ॥ सत्तोत्तरप्रसादार्थंतत्त्वत्रयनिरूपणम् ॥ १ ॥ यतिपतिमतनिष्ठा न्यासुनार्य्यत्रर्वधेरधिगतपरमार्थानास्तिकान्त्रीणयिष्यन् चिदचिदधिपतीनां चिन्नाथ अवंधंयतनुतवरार्य्यःस र्वतंत्रस्वतंत्रः ॥ २ ॥ सर्वतोनारायणस्यचरणावुपायत्वेनोपेयत्वेनाधिगंतव्याम् ॥ प्रथमंप्रकृत्यात्ममात्मविनिष्कृत्यर्थंत त्त्वत्रयनिरूपणंकर्त्तव्यमेव ॥ तत्त्वत्रयमित्यत्रचेतनंजीवईश्वरश्चकथ्यते. तत्रतत्त्वमितिप्रामाणिकैर्नामधीयते तच्चहि विधंद्रव्यमद्रव्यंचेति ॥ द्रव्यंचपुनर्द्विविधंविभज्यतेजडाजडमेदात् ॥ जडंपुनरव्यक्तंकालइतिद्रव्यंभवति ॥ अजडंपुनःप्रत्यक् पराक्चेतिद्विविधंभवति प्रत्यग्वस्तुचेश्वरोजीवइतिद्विविधम् ॥ पराग्वस्तुधर्ममूतज्ञानेनित्यविभूतिश्चेतिप्रकारद्वैविध्यम नुभवति ॥ एवंविभक्तात्तद्व्यपरार्थादितरत्सर्वमद्रव्यमितिपरस्परविभागः ॥ तथाचाव्यक्तकालजीवेश्वरनित्यविभूतिध र्ममूतज्ञानानिद्रव्यरूपेणवदन् ॥ अद्रव्यमेकमितिसूत्रकारस्तथाविभज्यानुसंधेयम् ॥ प्रामाणिकैःपरार्थंसंहतरूपेणतत्त्वत्रया त्मनासर्वमध्यनुसंधीयतेमनीषिभिःसर्वस्यापिपरार्थंस्यात्तत्त्वत्रयान्तर्भावात् ॥ अत्रनित्यविभूतेस्तेजोरूपत्वमात्रमेवनपुनः स्वयंप्रकाशत्वमित्येकदेशिनांपक्षः सर्वमेतदुक्तंभाष्यार्थैः ॥ अद्रव्यद्रव्यभेदान्वितमुभयविधंतद्धिदस्तुत्वमाद्रव्यंद्वेधानेत्रे वाचीसन्नयात् ॥ अज्ञाप्रत्वाद्विधावपिलिटोविधानात्तेरस्तिलुटलिङ्लीडिति ॥ जन्माद्यस्ययतः ॥ अस्यविरंचिन्मिश्रस्यत्वं स्थितसुखदुःखोपभोगस्यजगतोजन्मस्थितिलयायतः तद्धेतुत्वंप्रतिपादयतिश्रुतिरित्यर्थः ॥ मतोवाइमानिभूतानिजायन्ते येनजा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्मादुत्तरमतीतोऽहमक्षरादपि चोत्तमः; अतोऽस्मिँल्लोके वेदे च प्रथितः पुरुषोत्तमः इत्यादिस्मृतिनिगमयोः प्रत्यगात्मनोऽभेदेनब्रह्म
णोनिर्देशादपुरुषार्थत्वमिति नैः प्रत्यगात्मनोऽधिकमर्थान्तरभूतंब्रह्मनब्रह्मप्रत्यगात्मशरीरकतयान्तरात्मभूतेप्रत्यगात्मनस्सशरीरत्वंब्रह्मणस्तदात्मकंचचयथात्मनि
तिष्ठन्प्रत्यगात्मशरीरंस्वमेवभूतोऽतएवापरःपरमात्मेतिव्यपदेष्टेत्यादिनारायणःस्मादिस्मृतिशतसमधिगतं सशरीरस्यात्मनः कार्यावस्थाप्राप्तावपिपुरुणदोषस्य
वास्थानेहेयत्वभावात् ब्रह्मणोऽनवयवप्रश्नेऽपितिनासामेजस्वरशतवाक्येति नतदृष्टान्तभावादिस्मृते दृष्टान्तश्चैवमनुष्यादिशब्दाश्चसशरीरस्यात्मनो
मनुष्योबालोयुवास्थविरइतिनानाविधावस्थाप्राप्तावपिबालत्वयुवत्वस्थविरत्वाद्यः शरीरगतोदोषोनात्मानंस्पृशति आत्मगतास्तुज्ञानसुखाद्योगुणा
शरीरमिति अतःकारणस्यकार्यावस्थब्रह्मप्रत्यगात्मशरीरतयान्तरात्मभूतेभिति प्रत्यगात्मवाचिनाशब्देनब्रह्मभिधानेनछद्मसामानाधिकरण्यंच
दृष्टब्रह्मैनरसनीयमतश्चयं प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः उ॥ भे ज्ञानस्वभावादितिऔडुलोमिरप्युपन्यस्यन्नस्मत्पक्षेसतीतिकाशकृत्स्नइतिसूत्रैः नतरस्या
तदवानुप्रविशतदनुप्रविश्यसच्चत्यच्चाभवदितिप्रत्यगात्मन आत्मतयावस्थानात् ब्रह्मणोऽनवच्छेदनाभिधानेनसामानाधिकरण्येनउपदेशसं
क्तेतद्वैतमनर्हत्वेनोपन्नमोपपत्तत्वात् तथाहिरथीयति नवमंविभागार्हतिवत् नानाहित्वात् उपपद्यते चाप्युपलभ्यतेचेतिदेवमनुष्यादिवत्तम
एवजीवकर्मनिमित्तत्वे जीवानांतत्कर्मप्रवाहाणांचानादित्वंप्रतिपाद्यनदनादित्वंचनित्यानांचेतनानामेकोबहूनांयोविदधातिकामान्
शाज्ञोद्वावजावीशनीशावित्यादिश्रुतिमूलत्वात् तदनादित्वेऽपिप्रलयकालेचिदचिद्वस्तूनांभोक्तृभोग्ययोर्नामरूपविभागाभावादात्मभा
इदमेकएवाग्र आसीन्नान्यत्किंचनमिषदित्यादिश्रुतिशतैरेकत्वावधारणमुपपद्यतइतिसूत्रकारेणस्वयमेवोक्तं तथाचनात्मभूतेर्नित्यत्वान्नुतामर्थीप्रत्य
गात्मनोनित्यत्वादनुमानमुक्तं ज्योतिरुपक्रमात्तुतथाह्यधीयतएकेइतिसूत्रेण ब्रह्मैवात्मतयोपास्यत्वेनोक्तं तच्चनित्यत्वात् उभ्रेतिगतादिनारूपत्वेनोक्तं तच्चरूप
सारत्वान्नाधःपदेशाप्राज्ञवत् यावदात्मभावित्वान्नदोषः तद्दर्शनादितिजातिरात्मनोज्ञानशक्तिरूपज्ञानगुणसारत्वात् ज्ञानैकनिरूपि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति। सूत्रे यतः इति हेतौ पञ्चमी। जन्मस्थितिलयानां साधारणत्वात्। जन्मादेस्तु ब्रह्मनिमित्तोपादानरूपम्। विवक्षितं तैः यतः इति हि श्रुतिरुभयविषया कथमिति चेत्। यतो वाऽमी नीतिप्रसिद्धनिर्देशात्। प्रसिद्धश्चोभयविषयत्वात्सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्॥ तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत तत्र सदैवेत्यग्र एकमेवासीदिति उपादानतां प्रतिपाद्य अद्वितीयमिति। अधिष्ठानान्तरनिवारणेनासच्छब्दवाच्यमृषेर्वनिमित्तमुपादानं चेति विज्ञायते तथात ऐक्षत बहुस्यां प्रजायेयेत्यात्मनैवास्थिरसङ्कल्पतदैवसृष्टिरुक्तात्मनः॥ अतः श्रुत्वरीयतः इति हेतौ पञ्चमी। अतो वेदब्रह्मणो जगन्निमित्तत्वमुपादानत्वं च प्रतिपादितम्॥ अथ विरोधाभासान्मायीसृजतेविश्वमेतदित्यादिषु श्रुत्याचाक्षिप्य प्रसूतिम्॥ प्रतिज्ञाद्यदाहरणानुपरोधात्॥ अभिद्योपदेशाच्च साक्षाच्चोभयाम्नानात्। आत्मकृतेः परिणामात्। अभिसूत्रैः परिहरिष्यते। ननु च सर्वज्ञेसर्वशक्तिसत्यसंकल्पनित्यनिरवद्यतया निरस्तसमस्तापुरुषार्थगन्धं ब्रह्मैवात्मानमेविचित्रविविधनिमित्तमजगदुपादिदं सर्वमसृजतेति कथमुपपद्यते तदेतत्सूत्रकारः स्वयमेवपरिहरिष्यति॥ प्रपीतेतदुत्तरत्र संगारसमंजसं इतरव्यपदेशाद्धिताकरणादि दोषप्रसक्तिरिति चोद्यमुपरिहरतुनतुदृष्टान्तभावात्। अधिकंतुभेदनिर्देशादिति च क्षरंत्विद्याह्यमृतंतुविद्याविद्याविद्येईशतेयस्तुसोन्यःसकारणंकरणाधिपाधिपोन चास्यकश्चिज्जनिताननचाधिपः सरंप्रधानमृक्षरंहरः क्षरात्मानावीशतेदेवएकः अमृताक्षरंहरः अक्षिद्यतेसर्वमक्षरनाभीग्रथ्यतेनहरतीतिभोक्तृहरतुच्यते द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच॥ क्षरःसर्वाणिभूताविकूटस्थोक्षरउच्यते। उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः योलोकत्रयमाविश्यविभर्त्यव्ययईश्वरः॥ य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति ॥ अंशत्वं नामैकत्वेकदेशत्वं तथा सत्यु भयोरेकवस्तुत्वेना विशेषो न स्यादित्यु
शंक्याऽऽकाशादिवत्तु नैवं परऽइति परिहरति-अन्यविशेषणैकस्वभावप्रकाशजातिगुणशरीरविशिष्टादित्यव्यक्तिगुणात्मनः प्रतिऽकाशजातिगु
णशरीरा ॥ यथांशत्वमेवं परमात्मनः प्रत्यगात्मशरीरकं प्रतिप्रत्यगात्मनोंशत्वेएवमंशत्वेयत्स्वभावोंशो जीवः नैवमंशी परमात्मा सर्वत्रविशेषणवि
शेष्ययोः स्वरूपस्वभावभेदात् ॥ एवंकर्मशास्त्रार्थवत्त्वात् परात्मतत्त्वतिरित्यनेनान्तरेऽकंचनविरुध्यते एवंप्रकाशशरीरवत् जीवात्मनामंशत्वं
पराशरादयः स्मरंति च - एवं देशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणीयथा परिस्फुरति सत्यस्य जातेन वै द्विजतस्य सत्यस्य संभूतोतस
र्वं वै हरेस्तनुः तेसर्वेसर्वभूतस्य विश्वारंभसमुद्भवाइति० अस्यापरमार्थिकोपाधिसमाश्रयोनप्रत्यगात्मनोंशत्वे ब्रह्मणएवंवेदांतनिव
र्त्यीः सर्वएवदोषाभवेयुरित्याभासादेवचेत्यादिनोक्तम् ॥ अतः सर्वत्रचिदचिदेकस्तुशरीरंतत्कारणवस्थंकस्मिंश्चिद्विभक्तनामरूपचि
दचिदेकस्तुशरीरंतत्कार्यावस्थंब्रह्मसर्वेचिदचिद्वस्तुशरीरतयातादृशिब्रह्मैवपिब्रह्मणाः परिणामित्वापरुषार्थाश्रयत्वेशरीरभूतचेत
नाचेतनवस्तुगते- आत्मभूतेब्रह्मसर्वेदानिरस्तनिखिलदोषगंधनवधिकातिशयज्ञानानंदाद्यपरिमितोदारगुणसागरमवतिष्ठतइति
ब्रह्मैवजगन्निमित्तमुपासनंचेतियतोवाइमानिभूतानीत्यादिवाक्यैप्रतिपाद्यत्येवेतिजन्माद्यस्ययतस्तत्ब्रह्मेतिसूत्रेकृतम् ॥ सदेवसोम्य
दमग्रआसीदेवाद्वितीयंतद्धैक्षततद्बहुस्यांप्रजायेयेतितस्यचायमर्थः ॥ यस्यात्मापरशरीरंयस्याक्षरंशरीरंएषसर्वभूतांतरात्मा
अपहतपाप्मादिव्योदेवएकोनारायणइत्यादिश्रुतेः ॥ ब्रह्मणाःसर्वेचिदचिदेकस्तुशरीरकत्वात्सदेवसोम्येदमग्रआसीदित्यादिना
भेदनामरूपमग्नेःप्रलयकालेतिसूक्ष्मदशापन्नेचिदचिदेकस्तुशरीरतयानामरूपविभागानर्हमेकमेवाद्वितीयः सर्वज्ञः सर्वशक्तिरितिनि
मित्तान्तरानपेक्षमद्वितीयंचातिष्ठत्तदैक्षततद्बहुस्यांप्रजायेयेतितन्नामरूपविभागानर्हसूक्ष्मचिदचिदेकस्तुशरीरकंतयाएकंमेवस्थितंनामरू
पविभागार्हस्थूलदशापन्नावहुप्रकारःस्यामितिसैसंकल्पेतिचिदचिन्नाः परमब्रह्मणःप्रलयकालेपिव्यवस्थानार्हसूक्ष्मभेदः सर्वैश्रुतेदानादिभिरभ्युपेतः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यते ॥ अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिवृत्तात्मकजीवानुप्रवेश्य त- तरेवसर्वस्यवस्तुनोनामरूपभोक्तृ
लेनात्तस्रष्टात्रेवानुप्राविशत्- तरनुप्रविश्यमच्चत्यच्चाभवत् निरुक्तं चानिरुक्तं चनिलयनंचानिलयनंचविज्ञानंचा
विज्ञानंचसत्यंचानृतंचसत्यमभिवदितिचेत- नाचेतनंचपृथङ्निर्दिश्यतदुभयमनुप्रविश्यतत्तदभवत्तन्न च्छद्वाच्यो
भवदितिहिसमानप्रकरणेस्यच्छमभिहितं ॥ तन्निष्ठस्यमोक्षोपदेशात् ॥ इतश्चप्रधानार्थोतरंसच्छब्दाभिहितंतन्निष्ठस्य
मोक्षोपदेशात्तस्यतावदेवचिरं यावन्न विमोक्षे ॥ अथसंपत्स्यइतिहितन्निष्ठस्यमोक्षमुपस्थितेप्रधानकारणवादिना मपि
हिप्रधाननिष्ठस्यमोक्षोनाभिरिक्तः ॥ हेयत्वावचनाच्च ॥ यदिप्रधानमत्रविवक्षितंतस्यहेयत्वमध्येयत्वमुच्येत- मोक्षसाध
नतयाहिध्येयत्वमेवहन्त्रीयते- तत्त्वमसिश्वेतकेतोइत्यादिना ॥ प्रतिज्ञाविरोधात् ॥ इतश्चनप्रधानमेकविज्ञानेनसर्वविं
ज्ञानप्रतिज्ञाविरोधात्- सच्छब्दवाच्यतत्त्वज्ञानेनतत्कार्यतयाचेतनाचेतनसर्ववस्तुज्ञानंयेनाश्रुतंश्रुतंभवतीत्यादिनाश्रुति
ज्ञातंतद्धिनामरूपविभागभावाभावाभ्यांकार्यकारणेचेतिब्रह्मज्ञानेनरूढ्यास्यज्ञातत्वोपपद्यते ॥ स्याण्यात ॥ इतश्चनप्र
धानंस्वप्नान्तेसोम्यविजानीहीतियत्रैतत्पुरुषःस्वपितिनामसतासोम्यतदासंपन्नोभवतितस्माद्देनंस्वपितीत्याचक्षते
स्वंह्यपीतोभवतीतिजीवस्यचेतनस्यसुषुप्तस्यसतासंपन्नस्यस्वाप्ययवचनात्प्रधानमर्थोतरंभूतंसच्छब्दाभिधेयाय
तेस्वमपीतोभवतीत्यस्यार्थः ॥ चिदचिद्वस्तुशरीरकंतदात्मभूतंब्रह्मैवजीवशब्देनाभिधेयमितिसतासोम्यतदासंपन्नोभवतिस्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अविद्याकृतभेदस्योपाधिकृतभेदस्य चानादित्वाभ्युपगमात्॥ इयांस्तु विशेषः ब्रह्मैवान्नमुपाधिसंबंधं चेति सर्वश्रुतिस्मृतिन्यायवि
विरोधो यथा तद्भावाद्विरोधश्चास्माकमिति॥ शास्त्रयोनित्वात्॥ एवंविधस्यचिद्वस्तुशरीरतयाविशेषस्यब्रह्मणएवजगदुपादा
नत्वंनिमित्तत्वं च नानुमानादिगम्यमितिशास्त्रैकप्रमाणत्वात्तस्य यतो वाइमानीत्यादिवाक्यैर्निखिलजगदेककारणं बोधयद्भेवेतिसिद्धम्
तन्नुसमन्वयात्॥ पुरुषार्थतयान्वयः समन्वयः शास्त्रस्यप्रमाणस्यपुरुषार्थपर्यवसायित्वेपिब्रह्मस्वरूपस्य चाविशेषानुभवेस्व
रूपेणगुणैर्विभूत्यावानधिकातिशयानंदरूपमितिपुरुषार्थत्वेनाभिधेयतयान्वयात्॥ ब्रह्मणः शास्त्रप्रमाणकत्वमुपपन्नतरमिति
निरवद्यंनिखिलजगदेककारणंब्रह्मवेदान्ताः प्रतिपादयन्तीत्युक्तं तस्यैकस्यैकदेवकृतत्वजगन्निमित्तत्वंतस्यैवोपादानतयाज
गदात्मकत्वं चानानुमानादिगम्यमितिशास्त्रैकप्रमाणकत्वात्तस्य चानवधिकातिशयानंदरूपतयापरमपुरुषार्थत्वाद्वेदान्ताः प्रतिपादयन्ते
वेतिस्थिरीकृतं अतः परंपरमस्वरूपेणजगत्कारणतयाप्रधानपुरुषप्रतिपादनानर्हतया सर्वज्ञंसत्यसंकल्पंनिरस्तनिखिलदोषगंधपरि
मितोदारहरगुणसागरंब्रह्मैववेदान्ताः प्रतिपादयन्तीत्युच्यते॥ तत्रतावत्प्रधानंवेदान्तप्रतिपादनार्हमित्याह॥ ईक्षतेर्नाशब्दम्॥
अशब्दमानुमानिकंप्रधानंनतद्वेदान्तवेद्यंकुतईक्षतेः सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिप्रस्तुतजगत्कारणव्यापारवा
चिनश्च ईक्षतेर्धातोः श्रवणात्॥ तदैक्षततबहुस्यामितिच॥ गौण्यसंभवात्॥ तन्तेजऐक्षयतेत्यादौतेनैवस्तुत्यईक्षतिःश्रूयते
सहिगौणः॥ एवमन्यत्रापिप्रधानएवेक्षतिर्गौणइतिचेत्॥ नेतदुपपद्यतेप्रस्तुतेसच्छब्दवाच्येश्रूयमाणाचेतनवाचिनः आत्मशब्दस्य॥
सतआत्मातत्त्वमसिश्वेतकेतोइतिह्युत्तरत्रश्रूयते॥ तेजःप्रभृतिस्तुपिनगौणीक्षणातेजःप्रभृतिशब्दैरपितत्तच्छरीरकंब्रह्मैवाभिधी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्मनोर्पान्तरभूतः सर्वज्ञः परमात्मैव कुतोऽभ्यासात् आनंदमयस्य निरतिशयदशाशिरस्का नंदमयत्वेनाभ्यासानेयेशते प्रज्ञा
यतेरानंदाः सएकोब्रह्मणआनन्दः यतोवाचोनिवर्त्तन्ते अप्राप्यमनसासह आनन्दंब्रह्मणोविद्वान् न बिभेतिकुतश्चनेति
वेद्यत्वेनायमात्मानंदमयोनवधिकातिशयोभ्यस्यते॥ विकारशब्दान्नेतिप्राचुर्य्यात्॥ सवाएषपुरुषोन्नरसमयइतिवि
कारार्थमयट्प्रकरणादानंदमयइत्यस्यापिविकारार्थत्वंप्रतीयते॥ प्रेतोयमानंदमयोनाविकाररूपःपरमात्मेतिचेन्न॥ अर्थविरो
धात्प्राचुर्य्यार्थएवमयडितिज्ञायतेतस्माद्वाएतस्मादात्मन आकाशस्संभूतइतिश्रुतिविकारः॥ आत्माप्रकृतःप्रकरणेचविका
रार्थत्वंप्राणमयएवपरित्यक्तम्॥ उक्तेर्न्यायेनानंदप्राचुर्य्यादेवपरमपुरुषएवानंदमयः॥ तद्धेतुव्यपदेशाच्च॥ एषह्येवानंद
यातीतिजीवान्प्रत्यानंदहेतुरानंदमयोयंव्यपदिश्यते अतश्चनप्रत्यगात्मा॥ मान्त्यवर्णिकंभवच्चगीयते॥ सत्यंज्ञानम
नंतंब्रह्मेतिमंत्रवर्णोदितएवतस्माद्वाएतस्मादित्यादिनानंदमयइतिगीयते॥ अतश्चनप्रत्यगात्मासः॥ नेतरोनुपपत्तेः॥
इतरःप्रत्यगात्मामंत्रवर्णोदित्तइतिनासंकनीयम्॥ सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेतिप्रत्यगात्मनोवह्युक्तस्य
चैदृशविपश्चिद्ब्रह्मानुपपन्नेविपश्चित्त्वमितिद्युत्तरत्रव्यज्यते॥ सोकामयतबहुस्यांप्रजायेयेतिविचित्रस्थिरत्वसर्वज्ञत्वबहु
भवनसंकल्परूपमिदंविपश्चित्त्वमितिद्युत्तरत्रव्यज्यते॥ मुक्तस्यसर्वज्ञत्वापिजगद्व्यापारभावादीदृशविपश्चित्त्वसंभ
वः॥ भेदव्यपदेशाच्च॥ इतश्चतस्माद्वाएतस्माद्विज्ञानमयादन्योंतरात्मानंदमयइतिविज्ञानमयात्प्रत्यगात्मनोभेदेनायमानं
दमयोव्यपदिश्यते॥ नचविज्ञानमयविषयंतयोरुक्तेश्लोकेविज्ञानंयज्ञंतनुतेइतिव्यपदेशाद्विज्ञानमयोबुद्धिमात्रमित्याशंकनीयं-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by eGangotri Siddhanta eGurukul

मपीतो भवतीत्युच्यते ॥ तथा सम्मानप्रकरणे नामरूपपरिष्वंगाभावेन प्राज्ञेनैव परिष्वंगात् प्राज्ञेनात्मनापरिष्वंगेनवाह्यं किंचनवेदनान्तरमित्युच्यते ॥ आत्मोक्षाजीवस्य नामरूपपरिष्वंगदेवहि स्वव्यतिरिक्तविषयज्ञानोदयः सुषुप्तिकालेहि नामरूपे विहाय सत्तापरिष्वक्तः पुनरपिजागरदशायां नामरूपेपरिष्वज्यतत्तन्नामरूपाभवन्तीति श्रुत्यन्तरेस्पष्टमभिधीयते यदा सुप्तः स्वप्नं कंचनपश्यति तदास्मिन् प्राण एवैकधाभवति एतस्माद्वा आत्मनः प्राणोयथा यनंप्रतिकृतेयथातदहव्याघ्रोवा सिंहोवावृकोवा वराहोवान्यद्वान्यद्वा नेतितथा तथाभवन्नीतिच ॥ गतिसामान्यात् ॥ सकलोपनिषदुक्तिसामान्यादस्यामप्युपनिषदिनप्रधानकारणमितिज्ञायते आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नसृजाइतिसइमाल्लोकान्नसृजतेतस्माद्वाएतस्मादात्मनआकाशःसंभूतः सकारणकरणाधिपाधिपोनचाकश्चिज्जिताश्चाधिपश्चाहिसकलोपनिषत्सु सर्वेश्वर एवहिसर्वज्ञःकारणमितिप्रतिपाद्यते ॥ श्रुतत्वाच्च ॥ श्रुतमेतस्यामप्युपनिषदिआत्मनः प्राणआत्मनआकाशइत्यादावात्मन एवसर्वोत्पत्तिः श्रूयते प्रधानादेश्चेतनादेश्चेतरभूतःसर्वज्ञःपुरुषोत्तमएवजगत्कारणंब्रह्मेतिस्थितम् ॥ आनंदमयोभ्यासात् ॥ यद्यपिप्रधानादेरितरभूतस्यप्रत्यगात्मनश्चेतनस्येक्षणयोगःसंभवति तथापिप्रत्यगात्मावद्वैमुक्तश्चनजगत्कारणंतस्माद्वाएतस्मादात्मनआकाशःसंभूतःतस्माद्वातस्माद्विज्ञानमयादन्योन्तरआत्मानंदमयः इत्यस्यानंदमयत्वप्रतिपादनात्कारणंतयाव्यपदिष्टोपमानंदमयःप्रत्यगा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मनसात्वकल्मषेणसाधनान्तरवातागम्यंनचक्षुषागृह्यतेनापिवाचामनसातुविशुद्धेनेतिश्रुतेः सद्यरूपायारेवतायारूप
मुपदिश्यतेयथाभूतवादिहिशास्त्रंयथामहारजतंवासः वेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमसःपरस्तात्इति प्रकरणान्तरनिर्दि
ष्टाच्चसाक्षिणइतिहिरण्मयइतिरूपसामान्याच्चचैद्रसुखवदितिचवाक्यंतच्चयारवातंतेरेवनामयउचविकारमादायप्रयुज्यते॥
अनारब्धत्वादात्मनइत्यादिनाअतःप्रत्यगात्मनश्चार्थान्तरभूतोनिरुपाधिकविपक्षिद्रनाधिकातिशयानंदोप्राकृतासाधारणादि
व्यरूपःपुरुषोत्तमःपरंब्रह्मजगत्कारणमितिवेदान्तैःप्रतिपाद्यतइतिनिरवद्यम्॥भेदव्यपदेशाच्चान्यः॥यआदित्येतिष्ठन्नादि
त्यादंतरोयमादित्योनंवेदयस्यादित्यःशरीरंआदित्यमंतरोयमयतीतिसत्यात्मान्तर्यामिब्राह्मणेषुवाजसनेयिनांकण्वानां
मनितिषष्ठ्यन्तात्याध्यायंयः सर्वेषुलोकेषुतिष्ठन्नित्यधिलोकंयः सर्वेषुभूतेषुतिष्ठन्नित्याधिभूतंयः सर्वेषुवेदेषुतिष्ठन्नित्याधिदैवंयः
सर्वेषुयज्ञेषुतिष्ठन्नित्यधियज्ञमित्यंतर्यामिब्राह्मणेषुवाजसनेयिनांकण्वानांमाध्यंदिनानांपठ्यते॥यश्चायमस्मिन्नंतरे आकाशे
प्रजापतेरंतश्चरन्नसश्रूयतेमत्स्यःशरीरंयस्यसर्वेवेदाएषसर्वभूतान्तरात्माअपहतपाप्मादिव्योदेवएकोनारायणःसर्वेदेवसर्वतत्वसर्व
लोकसर्वभूतसर्वदेवसर्वयज्ञसर्वोमीपरिवर्तमानतयातत्तच्छरीरतयातत्तद्देवतात्मतयातत्तद्देवतयातत्तन्नियंतृतयाचभगवान्सर्व
भोगैरव्यपदेशाच्चायमपहतपाप्मानारायणःप्रधानात्प्रत्यगात्मनोर्थान्तरभूतोनिखिलजगदेककारणमितिसिद्धम्॥आकाशस्तल्लिंगात्॥एवंप्राणः॥सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंते॥आकाशंप्रत्यस्तंयंतिसर्वाणिहवाइमानिभूतानिप्रा
णमेवाभिसंविशंतिप्राणमभ्युज्जिहतइत्यादौसदेवसोम्येदमग्रआसीदित्यादिनासामान्येननिर्दिष्टस्यजगत्कारणस्यभूताकाश
प्राणसहचारिजीववाचिशब्दाभ्यांविशेषनिर्णयंकार्यासर्वाणिहवाइमानीतिप्रस्तुत्वनिर्दिश्यमानाजगत्कारणतालिंगा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यतःसूत्रकार एवेमामाशंकांपरिहरिष्यतिव्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययइति॥ विज्ञानमयश्चेतनतयातिशयादिक्रिया
यांजीवस्यकर्तृत्वव्यपदेशाच्च जीवः कर्त्ता विज्ञानशब्देनजीवस्याभ्युपदेशेबुद्धिमात्रव्यपदेशेविज्ञानेनेतिनिर्देशविपर्ययेः
स्याद्बुद्धेःकरणत्वादितिसः॥ कामाच्चनानुमानापेक्षा॥ इतश्चसोकामयतबहुस्यामितिस्वकार्यादित्यस्यजगत्सर्वः श्रूयते
प्रत्यगात्मनोहियस्यकस्यचित्सर्गेश्रुतेरनुमानापेक्षाहृश्यतेश्रुतेरनुमानगम्येप्रधानमानुमानम्॥ अस्मिन्नस्यचतद्योगंशास्ति॥
इतश्च अस्मिन्नात्मनंदमयोस्यप्रत्यगात्मनोर्थांतरभूतःसर्वज्ञःपुरुषोत्तमोजगत्कारणभूतानंदमयः॥ अन्नमस्तद्भोगंपदेशत्व
अयंजगत्कारणभूतोविपश्चिदानंदमयःकश्चिदुपचितपुण्यविशेषाजीवविशेषोदेहयोगात्सोयंपरमात्मेतिनाशंकनीयम्
यएषोन्तरादित्येहिरण्मयःपुरुषइत्यादौश्रूयमाणःपुरुषाकारःपरमात्मैवकृतः॥ तद्भेदेपदेशात्सएवसर्वैलोकानामीशः स
र्वेषांकामानांतस्यैरितिनामसएषसर्वेभ्यःपाप्मभ्योमुदितइतिनिरूपाधिकसर्वलोकसर्वकामेशत्वंतस्यैवकर्मवशत्वंचपुरु
गात्मनोर्थांतरभूतस्यहिपरमपुरुषस्यैवधर्मः॥ वेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमसःपरस्तात्इत्यादिषुगुणात्मकपुरुषत्वनेतर्मा
तापितृकृतस्वासाधारणरूपवत्त्वंचज्ञानादिगुणत्वेवनस्यैवश्रूयते ज्ञानाद्योपिसत्यंज्ञानंयः सर्वज्ञः सर्वेतिपराऽस्यशक्तिर्विविधैव
श्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्यादिषुश्रुतत्वात्तस्यगुणाविज्ञायन्ते॥ तथाचादित्यवर्णंतमसःपरस्तात्इत्यादिषुपाकृतस्वरूप
धारणरूपश्रवणान्नहिनाविज्ञायते॥ तदेतद्ब्रह्मकोशस्थोहिरण्मयः पुरुषोदृश्यतइतिप्राज्ञःसर्वान्तरःस्यात्॥ लोककामयतेपदेश
नाधीदंयत्तन्मेमित्युक्तात्कृपस्यकार्यत्वंमायामयंचेतिस्याद्रूपंकृतकमनुग्रहार्थंतद्धेतत्स्यामित्यर्थादितिनिरसनीयमतमुपन्य
स्यरूपवानीदृशमन्तःकरणप्रत्यक्षनिर्देशादित्याह॥ व्याख्यातेतद्विदाचार्यैः॥ नयेमायामात्रमजस्यैवविश्वस्रष्टृजोरूपेणचक्षुर्ग्राह्यो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेपंचाग्नेरित्यादिभ्यः सैषाविरादित्यादेः ॥ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ भूतपृथिवीशरीरहृदयैश्च तुल्यइतिव्यपदेशश्चपरमपुरुषे गायत्रीशब्दनिर्दिष्टेषूपपद्यतेइतिपूर्वोक्तप्रकारएवेतिसर्वंसमंजसम् ॥ उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् ॥ पूर्वत्रत्रिपादस्यामृतत्वंदिवीतिपरमपुरुषोव्यपदिश्यतेऽत्रापियदतः परोदिवइतिपंचम्यानिर्दिश्यदिवःसेवरूज्योतिरितिनप्रत्यभिज्ञेतिचेन्नतदुभयस्मिन्नपिव्यपदेशोविरोधाभावात् असौवैद्याग्नेयोनोवैद्याआत्यरतःश्येनइतिव्यपदेशावत् अत्रदिवःपरइमेवोभयत्रविवक्षितमित्यर्थः ॥ प्राणस्तथानुगमात् ॥ आत्मनांहितत्तत्मोक्षसाधनोपासनकर्मतयाप्रज्ञत्तजीवभावस्येमस्य प्राणोस्मिप्रज्ञात्मातमामायुरमृतमित्युपास्त्वेतिविधानात्प्राणवज्जगत्कारणम् ॥ कारणोपासनंहिमोक्षसाधनंतस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्यइतिश्रुतेइतिनाशंकनीयंप्राणशब्दसमानाधिकरणेनब्रह्मशब्दनिर्दिष्टोजीवार्थोन्तर्भूतब्रह्मलक्षणपरमात्मैवकुतःतथानुगमात्परमात्मासधारणानेदाज्जरामृत्यादिहापास्यस्यैमस्यप्राणनिर्दिष्टस्यानुगमोक्षप्रतेरेषएवप्राणएषप्रज्ञात्मानंदोजरामृतइतिनवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन् ॥ उपदेशेमामेवंविज्ञानीहीतित्वंवेधादिनाप्रज्ञात्मजीवभावस्यैमस्यउपदेष्टुंपरंब्रह्मदर्शयतिसंहारस्तदनुगुणोवर्णनीयइतिचेन्नेतत्- अध्यात्मंपरमात्मधर्मसंबन्धबहुत्वमस्मिन्नित्यध्यायेयेवाक्योपक्रमप्रभृत्योपसंहारात्दृश्यते ॥ यत्तेमनुष्यायंहितत्तमंमन्यसइतिहितत्तमोपासनंत्रयंतत्परमात्मधर्मः ॥ तमेवविद्वानमृतइहभवतिनान्यःपंथाइत्यादिश्रुतेः ॥ तथाह्येषएवसाधुकर्मकारयतीत्यादिनासर्वंकारयितृत्वमेवैताभूतमात्राइत्यारभ्यप्रज्ञामात्राःप्राणेर्पिताःइतिसर्वाधारत्वंतथानंदमयश्चएवलोकाधिपतिरित्यादि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भूताकाशजीवाभ्यामर्थान्तरभूतः परमपुरुषएवात्राकाशप्राणशब्दनिर्दिष्ट इतिनिश्चीयते। प्रसिद्धेस्तुचराचरभवनसंकल्पेसानवधिकातिशयानेकज्ञानशक्तिबलैश्वर्यवीर्यतेजोविज्ञानमयविलक्षणत्वनिरवद्यभुवनभयाभयहेतुसर्वलोकसर्वकामेशत्वसर्वपापक्षयादयाप्राकृतस्वाभाविकनिरवद्यस्वरूपविशिष्टस्वरविकरविकसितपुण्डरीकनयनस्यसर्वज्ञस्यसत्यसंकल्पस्यकरणाधिपाधिपस्यपरमपुरुषस्यैवनिखिलजगदेककारणत्वमितिसएवाकाशप्राणशब्दाभ्यांजगत्कारणत्वेनाभिधीयतेइतिनिश्चेयंयुक्तमेव। ज्योतिश्चरणाभिधानम्-

प्रपद्यतेपरोदिवाज्योतिषापैतेविस्पष्टमेवैषसर्वज्ञएषभगवान्सर्वेश्वरएषलोकेषुसर्वेषुरेवातदक्षरमित्युक्तमेषुलोकेषुरेवातदक्षरमस्मिन्ब्रह्मपुरेपञ्चोतिषित्यत्रसर्वस्मात्परत्वेननिर्दिश्यमानतयासकलकारणभूतज्योतिषःकौशियकज्योतिषेकलाभिधानात्सवाक्येविरोधलिङ्गादर्शनाच्चप्रसिद्धमेवज्योतिर्ङकारणत्वेनप्रतिपाद्यतइतिकेचिद्योयद्यपिस्ववाक्येविरोधलिङ्गनदृश्यतेतथापिपूर्वस्मिन्नवाक्येपरिदृश्यमानंसर्वभूतात्मत्वंतस्यैवज्योतिःशब्देनसर्वस्मात्परत्वेनसकलकारणत्वंतथाभिधीयते॥ अस्यचकौशियकज्योतिषेकलाभिधानंकलायोपदिश्यतइतिनकश्चिद्दोषः॥ अखिलजगदेककारणभूतःपरमपुरुषोऽप्राकृतस्वाभाविकदिव्यवर्णदिव्यरूपःतमसःपरस्ताद्वर्तेतइतितस्यैवनिरतिशयदीप्तियोगाज्ज्योतिःशब्दाभिधेयत्वंविश्वतःएवेदंचन्नुत्तमेषुलोकेषुप्रप्राकृतवासश्चयुज्यतएव॥ छंदोभिधानन्नेतिचेन्नतथाचेतोर्पणनिगमात्तथाहिदर्शनम्॥ एवंत्रिभायत्रीवाइदंसर्वंछंदांसिगायत्रआरब्धंछंदःप्रस्तुतमितिनात्रपरमपुरुषाभिधानमितिचेन्नेतत्परमपुरुषस्यैवगायत्रीसादृश्यानुसंधानेपरेशान्नस्यछंदोमात्रस्यसर्वभूतात्मकत्वानुपपत्तेरेवमेवेतिनिगम्यते॥ अन्यत्रापिहिछंदःसिसादृश्यात्छंदोनिर्देशोदृश्यते वाएतेपंचा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पनिषत्सु ब्रह्मैव हि जगज्जनित्र्यजीवनेतुतयाप्रसिद्धेयतोवाइमानीत्यादिषु ॥ विवक्षितगुणोपपत्तेश्च ॥ मनोमयत्वसत्यसं
कल्पादयोविवक्षितगुणाब्रह्मण्येवोपपत्तेः ॥ अनुपपत्तेस्तुनशारीरः ॥ दुर्वामप्रपरिमितसुखत्ववभागिनिशरीरिण्ये
षांगुणानामनुपपत्तेर्नशारीरोयम् ॥ कर्मकर्तृव्यपदेशाच्च ॥ एतमितःप्रेत्याभिसंभवितास्मीत्यभिसंभाव्याभिसंभावि
त्वेनप्रस्तुतब्रह्मजीवयोर्व्यपदेशादभिसंभाव्यब्रह्मजीवादर्थान्तरम् ॥ एषमआत्मान्तर्हृदयइतियत्काठकेप्रथमयाचजी
वेब्रह्मचव्यपदिश्यतेततश्चार्थान्तरम् ॥ सतेसोम ॥ प्रेचप्रथमयानिर्दिष्टःपुरुषोऽन्नमइतिनिश्चीयतेसर्वस्यचाहहृदि
सन्निविष्टइतिहिस्मृतिः ॥ अभेदकीर्तनाच्चाभेदव्यपदेशश्चनेतिचेन्नानिर्वाच्यत्वादेवंहोमवच्च ॥ एषमआत्मान्तर्हृदयेऽणी
यान्व्रीहेरित्यादिनाल्पस्थानत्वस्वरूपाल्पत्वव्यपदेशाच्चनायंपरइतिचेत्उपास्यत्वाद्धेतोस्तथाव्यपदेशः नस्वरूपा
ल्पत्वेनब्रह्मवत्स्वरूपमहत्त्वंचात्रैवव्यपदिश्यते उपायान्पथिव्याज्ज्यायानेतस्मात् इत्यादिना ॥ संभोगप्राप्तिरितिचे
न्नवैशेष्यात् ॥ संभोगप्राप्तिरितिचेज्जीववत्सुखदुःखोपभोगप्राप्तिः स्यादितिचेन्न हेतुवैषम्यात्परोह्यतोजीवस्यैवं
शरीरसंबंधः ॥ अत्ताचराचरग्रहणात् ॥ मस्यब्रह्मचक्षत्रंचउभेभवत ओदनोमृत्युर्यस्योपसेचनंकइत्थंवेदयत्रसइत्थंवेदयत्र
नस्त्रचितोऽन्यापरःपुरुषःब्रह्मक्षत्रोपलक्षितस्यचराचरस्यकृत्स्नस्यमृत्यूपसेचनत्वेनास्नीयतयाग्रहात् ॥ प्रकरणाच्च ॥ महान्तंवि
भुमात्मानंमत्वाधीरोनशोचतिनायमात्माप्रवचनेनलभ्यइत्यादिनापरस्यैवप्रकृतत्वात्सएवायम् ॥ गुरुंप्रविद्यावात्मानोहितन्दर्श
नात् ॥ अनन्यरंऋतेविदंतोसुकृतस्यलोकेगुरुप्रवेशदर्शनात्तंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितमितिपरस्ययाप्रोनसंभवत्यरिहंई

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नासर्वैश्वरत्वंच ॥ शास्त्रदृष्ट्यातूपदेशोवामदेववत् ॥ नामरूपव्याकरणादेः शास्त्रात्सर्वैः शब्दैः परमात्मैवाभिधीयतेऽति
दृष्ट्यातद्ज्ञापनायामन्त्रद्रष्टृभिरपिक्वचित्क्वचिच्छास्त्रदृष्ट्यातन्तच्छरीरकतयाचोपास्यत्वायोपदिश्यतइतिशास्त्रदृष्ट्यातूपदेशो
वामदेववदुपासात्रैविध्यादितिसाधितम् ॥ इतिश्रीमद्रामानुजविरचितेवेदान्तसारेप्रथमस्याध्यायस्यप्रथमःपादः ॥
ॐ ॥ श्रीहयग्रीवायनमः ॥ सर्वत्रप्रसिद्धोपदेशात् ॥ सर्वंखल्विदंब्रह्मेतिनिर्दिष्टेतत्सामानाधिकरण्येननिर्दिष्टंवस्तुपर
मात्मानुकृतः ॥ एवंप्रसिद्धोपदेशत्वंकुतोनिश्चीयतइत्यतआह ॥ तदुक्तंहेतुतयाव्यपदिश्यते ॥ ॥ सकलो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रीरस्थ॥ नायंप्रधानंजीवश्च तयोरसंभावितत्वात्सिद्धर्मीभिलापातः॥ प्रेत्यभावनयायथान्यात्तेतथाजीवोपीत्यर्थः॥ उभयेषिहिभेदेनैन
मधीयते॥ उभयेकएवामाध्यंदिनाश्च योविज्ञानेतिष्ठन् यआत्मनितिष्ठन् आत्मनोन्तरोयमात्मान वेदयस्यात्माशरीरं यआत्मानम
न्तरोयमयतीतिप्रत्यगात्मनोभेदेनैनंश्रुतयोभिप्रणमधीयते॰ अतःपरएवायम्॥ अक्षरमात्त्रिगुणाकोधर्मीकेः॥ अथपरा
यातदक्षरमधिगम्यतेयत्तद्देश्यमित्यरंभ्यमृतयोलिंपप्यन्तिधीराः॥ अक्षरात्परतःपरः इत्यादिनाप्रधानात्त्यक्तागात्मनआत्मं
तरंपरमात्माप्रतिपाद्यतेयःसर्वज्ञसर्ववित्त्वादिधर्मीकेः॥ विशेषणभेदव्यपदेशाभ्यांचनेतरौ॥ एकविज्ञानेनसर्वज्ञानरू
विशेषणव्यपदेशान्नप्रधानम्॥ अक्षरात्परतःपर इतिप्रधानात्परतःपरःप्रत्यगात्मनेपिपरइतिभेदव्यपदेशान्नप्रत्यगात्मा
अथवासमानाधिकरण्येनपरोऽक्षरात्चविशेषतःपरइतिभेदव्यपदेशः॥ रूपोपन्यासाच्च॥ अस्मिन्मूर्तेत्यास्मिन्शरीरे ते
क्षशरीरोपन्यासात्परमात्मा॥ वैश्वानरःसाधारणशब्दविशेषात्॥ आत्मानमेवेमंवैश्वानरमित्यादौवैश्वानरः प
मात्मजठराग्न्यादिषुसाधारणस्यापिवैश्वानरस्यास्मिन्प्रकरणेपरमात्मासाधारणैस्ववैश्वानरशब्दादिभिर्विशेषमाण
सार्थ्यमाणमनुमानेस्यादिति॥ द्युलोकादिपृथिव्यन्तरंरूपमग्निमित्यादिनासङ्गत्यभिधायमानस्यपरमात्मत्वेनुमानेलिंग
त्वार्थः॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेतिचेन्नतथादृष्ट्युपदेशादसंभवात्पुरुषमपिचैनमधीयते॥ सएषोग्निर्वैश्वानर
र्जनशब्दसामानाधिकरण्यात्प्राणाहुस्साधारत्वाच्चिभ्यः पुरुषोन्तःप्रतिष्ठितइत्यादेश्चनायंपरमात्मेतिचेन्नतज्जाठराग्निशा
त्वेनोपास्त्युपदेशाल्लोकवत्॥ जाठराग्नेस्त्रिलोकशरीरकत्वाद्यसंभवाच्चसएषोग्निर्वैश्वानरोयमपुरुषइतिनैवैश्वानरंपुरुषम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वता मयीगुरुंप्रविश्यतिष्ठतीतिजीवस्यकर्म्मफलान्यत्तीत्यादितिजीवः॥विशेषणाच्च॥जीवपरोवेवसर्वत्रास्मिन्प्रकरणेवि
शेष्येतेन जायतेम्रियतेवाविपश्चिदित्यादेर्जीवः॥अणोरणीयान्महतोमहीयान्नहन्यतेहन्यमानेविभुमात्मानंनायमात्माप्रवचने
नविज्ञानसारथिर्यस्तुमनःप्रग्रहवान्नरः सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदं इत्यादिषुपरः त्रिपादस्यामृतंदिवि
त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनरितिदिवंप्राप्तेः एवेषुसर्वतः पवित्रंवैनुत्तमेशुद्धेशुद्धमेवैतल्लोकेष्विति विप्रतेः प्राक्तावस्था
नात्परंविष्णोःपरमस्थानमेवसंसारध्वनःपारभूतंमुमुक्षुभिः प्राप्यन्तेहिविष्णोःपरमंपदंसदापश्यन्तिसूरयः तद्क्षरंपरमेव्योमन्क्षयंतम
स्परजसःपराकेविश्वंपुराणंतमसःपरस्तात् तेदेनाकंमहिमानःसचंतेयत्रपूर्वेइत्यादिसकलोपनिषत्सिद्धम्॥अन्तरउपपत्तेः॥ग्रहा
दिव्यपदेशाच्च॥यश्चैषुषितिष्ठन्नित्यादिनास्थितिनियमनादिव्यपदेशाच्चायंपरः॥सुखविशिष्टाभिधानादेवच॥केवलस्वरूपवृत्ते
तिपूर्वस्यैवसुखविशिष्टतयाभिधानाच्चायंपरः॥अतएवचसर्वम्॥यतस्तत्रभवान्यमीतायोपकोसलायब्रह्मजिज्ञासवेकंबल
स्वंबलेतुपरिवः यद्वाचकंतदेवरूपमितिसुखस्वरूपःस्वशब्दाभिधेयप्राकृतः परमेवब्रह्म॥श्रुतोपनिषत्कगत्यभिधानाच्च॥श्रु
तब्रह्मसूपाणामधिगतव्याप्तश्चिरादिगतरश्मिपुरुषश्मश्रुतवतेचिबमेवाभिसंविशन्तीत्यादिनाभिधानाच्चायंपरःपुरुषः॥अ
ग्रनवस्थितेरसंभवाच्चनेतरः॥॥परमादित्तरोजीवादिः नाड्याधारःचक्षुषिनियमेनानवस्थितेरसंभवाच्च॥अन्त
र्यामण्यधिदैवादिलोकादिस्मृतिरूपमेवोपदेशात्॥यःपृथिव्यांतिष्ठन्नित्यादिश्रुधिदैवादिलोकादिपरश्चिन्तितेषुवाक्येषुश्रूयमाणोन्तर्या
मीपरः पुरुषःसर्वान्तरत्वसर्वविदित्वसर्वशरीरकत्वसर्वनियंतृत्वादिपरधर्मव्यपदेशात्॥ नचस्मार्त्तेमतद्धर्माभिलापाच्छा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यनिरंजनःपरमंसाम्यमुपैति· तथाविद्वान्नामरूपाद्विमुक्तःपरात्परं पुरुषमुपैतिदिव्यमितिचपुण्यपापमामरूपनिर्मुक्तानांप्राप्य
तयाव्यपदेशाच्चायंपरः॥ नानुमानमतच्छब्दात्तु प्राणभृच्च॥ यथाप्रधानमतच्छब्दान्न तथानप्राणभृदीत्यर्थः॥भेदव्यपदेश
तू॥अनीशयाशोचतिमुह्यमानः जुष्टंयदापश्यत्यन्यमीशमित्यादिनाप्रत्यगात्मनोभेदेनव्यपदेशाच्चायंपरः॥धर्मोपपत्तेश्च॥
अप्यपरायणात्परंब्रह्मगम्यतइत्यादिपरस्यहीदंप्रकरणम्॥स्थित्यदनाभ्यांच॥ तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्नन्योभिचा
कशीतीतिजीवस्यकर्मफलादनमभिधायानश्नन्नितरोदीप्यमानस्वस्थित्यभिधानाच्चायंपरमात्मा॥भूमासंप्रसादादध्युपदेशात्
सुखंत्वेवविजिज्ञासितव्यं भूमात्वेवसुखमितिसुखाभूम्नःस्वरूपंहयत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेति
यस्मिन्सुखेनुभूयमानेतद्व्यतिरिक्तंकिमपिसुखत्वेनगृह्यमाणंनपश्यतिनशृणोतिनविजानातिसभूमेत्युच्यते॥ प्रथमत्राऽन्यत्पश्यत्य
श्यत्यन्यच्छृणोति·अन्यद्विजानाति तदल्पमितिवचनात्तथाचमहाभारतेदिव्यानिकामचारीणिविमानानिसभास्तथा·आकी
र्णविविधाराजन्· पद्मिन्यश्चामलोदकाः एतेवैनिरपास्तातस्थानस्यपरमात्मनइतिएषतुवाअतिवदतीतिप्र
स्तुतमतिवादित्वमेवंभर्जंसंअतिवादित्वंहिस्वोपास्यपुरुषार्थाधिक्यवादित्वंहितदल्पमित्यस्यप्रतियोगित्वेनभूमेत्युक्तप्रकार
वैफल्यविशेषसुखस्वरूपवाची अयंभूमशब्दव्यपदिष्टःपरमात्मासंप्रसादादध्युपदेशात्तंसंप्रसादःप्रत्यगात्मा॥अथयएषसंप्रसा
दोऽस्मात्शरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिश्रुतेः॥एषतुवाअतिवदतियस्सत्येनेत्यादिनाप्राणशब्दनिर्दिष्टात्प्रत्यगात्मन ऊर्ध्वंअर्थान्तरत्वेनाभ्युपदेशात्॥धर्मोपपत्तेश्च॥स
भगवः कस्मिन्प्रतिष्ठितःस्वमहिम्नीत्यादेर्व्यपदिष्टानांस्वमहिम्नि प्रतिष्ठत्वसर्वाकारत्वसर्वात्मत्वादिधर्माणांपरस्मिन्नेवोपपत्तेश्चभू
मापरः॥अक्षरमंबरान्तधृतेः॥ एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदन्त्यस्थूलमनण्वित्यादिनाभिहितमक्षरंब्रह्मपरंअंबरान्तध्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रत्पाप्तिः अन्यत्रदर्शनाभावेऽस्मेवपर्य्यायमस्यपरमात्मत्वेलिंगेयद्दृश्यकशेषपरिसर्वस्यवस्तुमात्रत्वे दृश्यं वस्तुलोकप्रश्च ॥ धर्ते अत्रमस्मिन्नोस्यास्मि
नुपलब्धेः ॥ अथ आत्मासंतुविधृतिरितिजगद्धेतुः परमात्मनोमस्मिन्अस्मिन्शरीरेशा काशउपलब्धेश्चायंपरः सहिपरमात्मनोमहिमाएवसं
तुविधरणेऽत्यन्तिश्रुतेः ॥ अस्मिंश्च ॥ आकाशशब्दस्ययदेवाकाशआनंदइतिपरमात्मन्यपिप्रसिद्धेश्चायंपरः सत्यसंकल्पादिगुणंद्वारोपकृते
ताप्रसिद्धिर्भूताकाशप्रसिद्धेर्वेतीयसीत्यर्थः ॥ इतरपरामर्शात्सइतिचेन्नासंभवात् ॥ अथयएषसंप्रसादइतीतरस्यजीवस्यपरामर्शात्प्रकृता
काशःसइतिचेन्नेततउक्तगुणनोतत्रासंभवात् ॥ उत्तरात्चेदाविर्भूतस्वरूपस्तु ॥ उत्तरत्रयआत्माश्रुपहतपाप्मेतिजीवस्यापहतपाप्मत्वा
दिश्रवणान्नासंभवः ॥ जागरितस्वप्नसुषुप्त्याद्यवस्थाक्रान्तिमत्त्वात्सहिजीवइतिचेन्नेतदाविर्भूतस्वरूपस्तुकर्मोद्भवशरीरसंबं
धित्वेनाऽऽतिरोहितापहतपाप्मत्वादिकः पश्चात्परंज्योतिरुपसंपद्याविर्भूतस्वरूपस्तत्रापहतपाप्मत्वादिगुणकोजीवः प्रतिपाद्यतेः
दहराकाशश्चातिरोहितकल्याणगुणगणसागरइतिनात्रजीवः ॥ अन्यार्थअपरामर्शः ॥ अस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्व
नरूपेणाभिनिष्पद्यतेइतिजीवात्मनोदहराकाशोपसंपत्त्यास्वरूपाविर्भावोपपादनार्थंअजीवपरामर्शः ॥ अल्पश्रु
तेरितिचेन्नदुक्तम् ॥ अल्पस्यानत्वेनाल्पत्वश्रुतेर्नायंपरमात्मेतिचेन्नोत्तरमुक्तंनिचाय्यत्वादेवंव्योमवदेति ॥ अनुकृतेस्तस्यच ॥ तस्यदहरा
काशस्यपरंज्योतिषोनुकारअत्रगुणाद्भजीवस्यजीवोदहराकाशः सतत्रपर्य्येतिजक्षत्क्रीडन्रममाणइत्यादस्तुपसंपत्स्वरूपद्रव्यनिरूपस्त
दनुकारेश्रूयते ॥ अपिचस्मर्यते ॥ इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः सर्गेऽपिनोपजायन्तेप्रलयेनव्यथन्तिचइति ॥ शब्दइतिचेन्नातः ॥
अणुरुपमात्रः पुरुषोमध्यआत्मानितिरुतिर्हिशानोभूतभव्यस्थितिसर्वेश्वरत्वशब्दादेवः ॥ हृद्यपेक्षयातुमनुष्याधिकारित्वात् ॥ अनवच्छिन्न
मनुष्यासक्तेर्हृदिवर्त्तमानत्वापेक्षयांगुष्ठमात्रत्वंमनुष्याणांमनोपासनसंभवनयातद्विषयत्वाच्छास्त्रस्यस्थितेतावत् ॥ तदुपर्य्यपिबादर

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेः सर्वविकाराधारो ह्ययमाकाशो वायुमरं वरस्यां तः कारणम् ॥ स्याच्चप्रशासनात् ॥ स्याच्चैतदेवं यथोक्तं
र्य्याच्चन्द्रमसौ विधृतौतिष्ठतइत्यादिनाप्रशास्त्रात्तस्याः क्रियमाणश्रुयते ॥ श्रुतइदमक्षरं प्रत्यगात्मा चेनभवतीत्यर्थः ॥ अन्य
न्यभावोन्यत्वंमुद्दश्य दृश्यत्वादिनापरमात्मनोऽन्यत्वेह्यक्षरस्यव्याख्यातियतोवक्ष्यते ॥ इक्षतिकर्मव्यपदेशात्सः ॥ यपुनरेतं
त्रिमात्रेणोमित्यनेनैवाक्षरेणपरमपुरुषमभिध्यायीतेतत्वारभ्यसएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतइत्यत्रध्यायतिपूर्व
क्षतिकर्मणःपरमात्मेत्यर्थः ॥ उत्तरत्रतमीकारेणोक्तानन्वितिचेन्नह्यन्यच्छेषतयजरमसत्तमभयंपरंचेतिपरमपुरुषसा धो
रणधर्मव्यपदेशात् ॥ यत्तत्कवयोवेदयन्नइतितदीयस्थानस्यसूत्रेभिदेयत्वव्यपदेशाच्च ॥ दहरउत्तरेभ्यः ॥ अथयदिदमस्मिन्
ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नन्तराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यंतद्विजिज्ञासितव्यमितित्रदहराकाशशब्दनिर्दिष्टः परमा
त्मोत्तरेभ्योवाक्यगतेभ्यस्तदसाधारणधर्मेभ्यः ॥ उत्तरत्रदहराकाशस्यसर्वाधारतयातिमहत्त्वमभिधायतत्सत्यंवक्ष्यमं
पुरमितिनिर्दिश्यतस्मिन्ब्रह्मपुरेदहराकाशेतस्मिन्कामाः समाहिताइत्युक्तः कोयंदहराकाशः केचकामाइत्यपेक्षायामेषआत्मापहत
पाप्माइत्यारभ्यसत्यकामसत्यसंकल्पइत्यन्तेनदहराकाशआत्माकामाश्रापहतपाप्मत्वादयस्तद्विशेषणीभूतगुणाइतिहोक्तंभवति दहरोस्मिन्न
न्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमित्यमित्रत्रदहराकाशस्तदन्तर्वर्त्तिनिश्चयन्तपुभयमन्वेष्टव्यमितिहोचयते ॥ अथयइहात्मान
मनुविद्यव्रजंत्येतान्सत्यान्कामानितिहिव्यज्यते ॥ गतिशब्दाभ्यांतथाहिदृष्टंलिंगञ्चेमएवमेवामाः सर्वाः प्रजाअहरहर्गच्छंत्यएनंब्रह्म
लोकंनविदंतीत्यस्मरुःसर्वासांप्रजानांतदुपजीवनतीनांदहराकाशोपरिवर्त्तमानत्वंदहराकाशसमानाधिकरणंब्रह्मलोकशब्दश्चदहरा
काशः परंब्रह्मेतिज्ञापयतितथाह्यन्यत्रसर्वासांपरमात्मोपरिवर्त्तमानत्वेदृष्टन्तस्मिन्लोकाश्रिताःसर्वेत्स्वरेपरमेप्रजाः एषब्रह्मलोक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यस्यतीति ॥ श्रुतिस्मृतिभ्यामाधिक्यं पूर्ववत्स्वजतीत्यवगम्यते श्रुतिस्तावत्सूर्याचांद्रमसौ धातायथापूर्वमकल्पयत्इत्यादियोब्रह्माणं
विदधातिपूर्वं यो वै वेदांश्चप्रहिणोतितस्मै इतिच ॥ स्मृतिरपियथर्तुं ऋतुलिंगानिनानारूपाणिपर्यये दृश्यंतेतानि तान्येवतथाभावायुगादि
ष्विति ॥ वेदस्यनित्यत्वेचपूर्वपूर्वोच्चारणक्रमविशिष्टस्यैवसर्वदोच्चारणात्वम् ॥ मध्वादिष्वसंभवादनधिकारंजैमिनिः ॥ मधुवि
द्यादिषुवस्वादिदेवानामेवोपास्यत्वात्तत्रापत्वाच्चतत्रवस्वादीनांकर्मकर्तृभावविरोधेनोपास्यत्वासंभवादसूनांसतांवसुत्वंप्राप्नुमिति
प्राप्यत्वासंभवाच्चतत्रवस्वादीनामनधिकारंजैमिनिर्मेने ॥ ज्योतिषिभावाच्च ॥ तेदेवाज्योतिषांज्योतिरायुर्होपासतेमृतमितिज्योति
षिपरस्मिन्ब्रह्मणिदेवानोसाधारणेनप्राप्तेरप्यधिकारभावंवक्ष्यनारस्यत्रवस्वाद्युपासनेनाधिकारोन्यायसिद्धोऽवगम्यते ॥ भा
वंतुबादरायणोऽस्तिहि ॥ मधुविद्यादिष्वपिवस्वादिनामधिकारभावंभगवान्बादरायणोमन्यते अस्तिहिवस्वादीनांसतांस्तावत्स्थूलब्रह्म
णुपास्यत्वसंभवःकल्पान्तरेवसुलाभेःप्राप्यत्वसंभवश्चैकल्पेमधुविद्यादेःस्मर्यतेस्मृतिस्मृत्यवगतेरित्यर्थः एवंमध्वादिष्वपिवस्वादीनां
देवतेतिमधुविद्यायांबलविद्यात्वमाहश्रुतेः कार्यकारणोभयावस्थंब्रह्मतत्रोपास्यंकल्पांतरेवस्वादित्वंमनुभ्रयाधिकारावसानेबलप्राप्ति
श्चनविरुद्धा ॥ युगस्यतदनांतरश्रवणात्तदाद्रवणात्सूच्यतेहि ॥ बलविद्यावैकल्पेनस्वात्मानंप्रतिहसोकानारदंतत्सूच्यते आजजानेमाः प्रू
देत्यादौबलविद्योपदेशेशिष्यंप्रतिप्रजापतेर्नरोनशिष्यस्यब्रह्मज्ञानाप्राप्तांशुकशोचतीतिहिपूर्वंतेनोक्तंशोचनाकृद्रः नजातीतियोन कृतस्त
दनुरूपश्रवणात्ब्रह्मविद्यावैकल्पेनस्वात्मानंप्रतिहसोकानारदंवाक्यश्रवणात् तथैवाचार्यंप्रत्येतद्रवणात् शिष्योहितौयतःप्रूदेत्या
मंत्रेणनजातियोगेनभूरुस्यब्रह्मोपासनाधिकारोनसूच्यते ॥ क्षत्रियत्वावगतेश्चोत्तरत्रचैत्ररथेनलिंगात् ॥ क्षत्रियत्वावगतेश्चोत्तरत्रनजातियोगेनभूदेत्यामंत्रेण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रायणः संभवात्॥ तद्धेतोपासनमुपरिदेवादिश्चम्यर्थित्वसामर्थ्यसंभवादितिभगवान्बादरायणोमेनेसंभवश्चपूर्वोपार्जितज्ञानादि
स्मरणमैत्रार्थवादेषुवियदादिमत्तयास्मृतिस्तुतिदर्शनात्तुपपत्तेमेतत्प्रोक्तेतेषामेवप्रामाण्येनवियदादिमत्त्वात्॥ विरोधकर्मणी
तिचेन्नानेकप्रतिपत्तेर्दर्शनात्॥ वियदादिमत्त्वेएकस्मानेकयोगमुगत्संनिधायोगात्कर्मणिविरोधइतिचेन्नशक्तिमत्सुसोभरि
प्रभृतयुगपदनेकदेहप्रतिपत्तेर्दर्शनात्॥ शक्तिरूपस्यसाधनत्वेनोत्पत्तिमत्त्वादिदादिदेहोत्पत्तेः प्राग्विनाशदूर्ध्वंचवैदिकैर्द्रष्टिशक्त्यनामर्थशून्यत्वमनित्यत्वंवास्यादितिचेन्न॥ अतोवैदि
कादेवस्रष्टिशब्दादिन्द्रादयस्तदेवंमहदादिशब्दानव्यक्तिवाचकाः॥ अथवातुगवादिशब्दवदाकृतिवाचिनः पूर्वस्मिन्निंद्रादौविनष्टेवैदि
केऽस्रष्टिशब्दादेवबलापूर्वेन्द्राद्याकृतिस्थावरेदेवरूपेव्याकरोत्सतासतौप्रजापतिःसभूरितिव्याहरत्तत्सभूमिमसृजतेत्यादिकास्मृति
रपिसर्वेषांतुसनामानिकर्माणिचपृथक्पृथक्वेदशब्देभ्यएवादेःपृथक्संस्थाश्चनिर्ममेइति॥ अतएवचनित्यत्वम्॥ यतोवक्ताचवैदिका
च्छब्दार्थंन्मत्वासृजतिअतएवमंत्रलोकेणीतेविश्वामित्रप्रसूतेभवतीतिविश्वामित्रादीनांमंत्रादिकर्तृत्वेपिमंत्रादिमयवेदस्मृतिस
त्वेतिहतिपुनर्धीनमंत्रादिदर्शनवन्नदोषएवंविश्वामित्रादीनतत्तैर्वैदिकशब्दैःसरूपतदाकारानपरान्तत्तच्छक्तियुक्तान्सृजतीतिबलानेमितिके
प्रलयानंतरंतेचानाधीत्यैवतानेवमंत्रादीनस्मरंतिवदन्ति॥ अतस्तेषांमंत्रादिकर्तृत्वेवदनित्यत्वंचास्तितत्प्रलयेकर्तृचतुर्मुखेवेद
चविनष्टेकथंवेदस्यनित्यत्वमित्यत्राह॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्च॥ अतएवस्रष्ट्यानंतरंसमाननामरूप
त्वाच्चावृत्तप्रलयाच्चावृत्तावपिनविरोधः॥ पारिक्षित्तीपरमपुरुषोघोरंवर्षसंस्थामनुजगस्रजति॥ वेदमंत्रपूर्वंविशिष्टानाविस्रष्टेश्चतुर्मुखा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तरत्वाम् तत्वादित्यपेक्ष्यतत्वमस्यादिनैक्यव्यपदेशान्नप्रत्यगात्मनोऽर्थान्तरभूतःपरमपुरुषइत्याशंक्याह।।सुषुप्तौ
त्योर्भेदेन।।प्राज्ञेनात्मनासंपरिष्वक्तोनवाऽविंचनवेदनान्तरंप्राज्ञेनात्मनाऽन्वारूढइतिसुषुप्तौक्तोन्त्योवाह्यान्तरवि
षयाज्ञानप्रत्यगात्मनस्तत्रानीनिवप्राज्ञतयाभेदेनव्यपदेशादर्थान्तरभूतएव।।पत्यादिशब्देभ्यः।।पतिर्ह्यजंक्षेत्रज्ञं
यमाणेभ्यःपत्यादिशब्देभ्यश्चायमर्थान्तरभूतःसर्वस्याधिपतिः।। सर्वस्यवशीसर्वस्येशानइतिश्रुत्तरत्रश्रूयते।एकोपदेशश्च
स्थितेरितिकाशकृत्स्नइत्येनंजीवस्यशरीरभूतस्यात्मतयावस्थितेरितिस्थेयमेवपरिशिष्यति।।३८।इतिश्रीभगवद्रामानुजवि
रचितेवेदसारेप्रथमस्याध्यायस्यतृतीयःपादः।।३८ आनुमानिकमप्येकेषामितिचेन्नशरीररूपकविन्यस्तगृहीतेर्दर्शयति
च।।एकेषांकठानांशरीरात्यायामानुमानिकंप्रधानंजगत्कारणत्वेनमहतःपरमव्यक्तमित्युच्यतेतेचैतत्पूर्वत्रात्मानंविद्धिइत्यादि
षूपासनोपायेषुवशीकार्यत्वापरिग्रहायेदंरूपकविन्यस्तंशरीरात्मरूपकविन्यस्तस्यात्मशब्देनगृहीतेः।इंद्रियेभ्यःपरा
इत्यादिनाहिवशीकार्यत्वेपरोच्यते तथाचान्तरप्रकृतेरेवदर्शयति।। यच्छेद्वाङ्मनसिप्राज्ञइत्यादिना।।सूक्ष्मंतुतदर्हत्वात्।।
सूक्ष्मंव्यक्तमित्यर्थः।। अव्यक्तमेवशरीरात्मनास्थंकार्यार्हमित्यव्यक्तशब्देनशरीरमेवगृह्यते यदिरूपकविन्यस्तानामेवग्रहणेकिमर्थम
व्यक्तासुरूपःपरइत्याह।।तदधीनत्वादर्थवत्।।पुरुषाधीनत्वादात्मशरीरादिकमर्थवदुपासननिर्वर्त्तयेभवतीतिपुरुषान्तर्य्यो
मीसर्वमात्मादिकंत्रैरयन्नुपासनोपायत्वेनवशीकार्यंकाङ्क्षाप्राप्तंप्रतिसाकाङ्क्षासापरागतिरित्युच्यते।।ज्ञेयत्वावचनाच्च।।
अत्राव्यक्तस्यज्ञेयत्वावचनाच्चकापिलमव्यक्तंनेति।।वदतीतिचेन्नप्राज्ञोहिप्रकरणात्।।अशब्दमस्पर्शमित्यारभ्यनिचाय्यत्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by eGangotri Sharada Peetham

उपक्रमेनदुदाहरणात्पतित्वप्रयोजनान्नदायित्वबहुग्रामप्रदानेस्तस्यक्षत्रियत्वेगम्यते॥ उत्तरत्रचैत्ररथेनलिंगात्॥ उपमिद्धा
श्वेत्यादिवाक्यशेषाद्ब्राह्मणक्षत्रिययोरेवान्वयोदृश्यते॥ अथहरयोनकंचकाययमभिप्रतारिणश्चेत्यादौ अपिप्रतारीचैत्ररथःक्षत्रियः अभि
प्रतारिणश्चैत्ररथत्वंक्षत्रियत्वेवागतं एतेनचैत्ररथकाययाप्रयाज्ञयनइतितस्माच्चैत्ररथानामेकःक्षत्रपतिरजायतइतिप्रतिज्ञा
यंगिद्योनचतुर्थः॥ संस्कारपरामर्शात्तदभावाभिलापाच्च भविद्योपक्रमेउपलानेघ्यइसुपनयनपरामर्शस्मृइस्मतद्भावाभि
लापाच्छूद्रस्यब्रह्मविद्याधिकारः॥ नशूद्रेपातकंकिंचिन्नचसंस्कारमर्हतीतिहीनसंस्काशनिषिद्धः॥ तदभावनिर्द्धारणेचप्रवृ
त्तेः॥ नैतद्ब्राह्मणेपिवक्तुमर्हतिसमिधंसोम्याहरेतिश्रुत्वाभावनिश्चयउपेत्यप्रवृत्तेश्चनाधिकारः॥ श्रवणाध्ययनार्थप्रतिषेधा
त्॥ शूद्रस्यश्रवणाध्ययनादीनिनिषिध्यन्तेतस्माच्छूद्रसमीपेनाध्येतव्यमिति॥ अनुपश्रुत्यैवतेाध्ययनादिनसंभवति॥ स्मृतेश्च॥
त्रैवर्ण्यकेतरिशूद्रस्यैवश्रवणादेरुदयःग्रथतस्यैवेरमुपश्रुत्यैवतः त्रयोजनुभ्योश्रोत्रप्रपूरणमुदाहरणेजिह्वाछेदोधारणेशरी
रभेदइतिस्मृताद्युत्तरम्॥ कंपनात्॥ ऋजुश्चप्रमितश्चकरणमध्येयदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतमित्यादिनाग्रभिहितं
गुह्यप्रमितप्राणशब्दनिर्दिष्टजनितभयादग्निर्वायुर्मृत्युर्देवाःप्रभृतिक्षुत्क्षामेजगत्कंपनादगुह्यप्रमितेःपरः पुरुषइतिनिश्चीयते॥ज्योति
र्दर्शनात्॥ तत्करणेनतत्रसूर्योभातीत्यारभ्यतस्यभासासर्वमिदंविभातीतिभाःप्राक्काभिहितस्थानेवधिकातिशयाज्योतिषोर
पीनादगुह्यप्रमितःपरमपुरुषः॥ आकाशोर्थान्तरत्वादिव्यपदेशात्॥ आकाशोहवैनामरूपयोर्निर्वहितातेयदन्तरातद्ब्रह्मेत्यु
दितानिर्दिष्टआकाशोभूतोशरीरमितिप्रकृतात्प्रत्यगात्मनःपरिशुद्धादर्थान्तरभूतःपरःपुरुषः॥ नामरूपयोर्निर्वोढृत्वंतदसंस्पर्शरूपार्थो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

छन्दनिर्देशब्दसाधारण्यात्तेभ्यश्चभावादेतेषांतत्प्रतिरेकाच्चयच्छब्दनिर्दिष्टमाकाशश्रेतिद्वयमतिरिक्तं संख्योपसंग्रहादपीत्यपिशब्दान्नात्रपंचविंशतिसंख्यासंग्रहः किंतर्हि पंचसंख्यासंग्रहायामितिसंज्ञाविषयोयंपंचजनाइतिपंचजनानामकेचित्तेपंचेतिपञ्चपञ्चजनाइत्युच्यन्तेसप्तसप्तर्षयइतिवत्॥ प्राणाद्यो वाक्यशेषात्॥ पञ्चजनसंज्ञिताप्राणादयः पंचेन्द्रियाणीतिप्राणस्यप्राणमुतचक्षुषश्चक्षुरितीदिवाकरशेषादवगम्यतेचक्षुःश्रोत्रमनःप्राणचर्म्मप्राणान्नशब्दावपीतिस्पर्शनादिइंद्रियविषयौ॥ ज्योतिषैकेषामसत्यन्ने॥ एकेषांशाखिनांप्राणादिपञ्चकाण्वानामन्नस्यान्नमित्यस्तितंदेवाज्योतिषांज्योतिरितिश्रुतेःपञ्चजनाइंद्रियाणीतिह्यायंतेज्योतिषांज्योतिःप्रकाशकानांप्रकाशकंवृहदारण्यकेतुकण्वानंतरंपञ्चपञ्चजनाइतिश्रुतेःतेप्रकाशकाःपंचेंद्रियाणीतिगम्यते॥ कारणत्वेनाकाशादिषुयथाव्यपदिष्टैकेषां॥ आकाशादिषुक्रमेणैवैषकारणत्वेनसर्वत्रैवदृश्यतेवाक्येषु॥ असद्वाइदमग्रआसीन्नइदंतर्ह्यासीत्तदाहुःकिंतदासीदित्यादिषुअजिज्ञासितविशेषेषुचाम्नायतेवाइदमेकएवाग्रआसीत्सएकएतलोकान्नव्यसृजतइतिविशेषवाचिवाक्यनिर्दिष्टस्यैवेक्षणात्॥ नतर्हिकथंव्याकृतादिकारणवादप्रसंगःइतिश्रुतसमाकर्षणात्॥ सोकामयतबहुस्यांप्रजायेयेतिदृक्षेनिर्दिष्टस्यसर्वज्ञस्यैव॥ असद्वाइदमग्रआसीत्तदुत्पत्तिसमाकर्षात्सएवेतिगम्यते॥ तदेतदेवव्याकृतमासीदितिनिर्दिष्टस्यैवसएषइहप्रविष्टआनखाग्रेभ्यइतिश्रुतेः॥ असद्व्याकृतादिप्रवक्तृदानांनामस्यविभागाभावादुपपद्यते॥ जगद्वाचित्तात्॥ वक्तेतिप्रवचनीसुपत्रस्ययोवेबालाकएतेसांपुरुषाणांकर्त्तोयस्यचैतत्कर्मसर्वंवेदितव्यइत्यत्रकर्मणश्चेतनशब्दसामानाधिकरण्येनक्रियेतइतियुक्तंत्याजगद्वाचित्वात्परमेवब्रह्मवेदितव्यतयोपदिष्टम्॥ जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात्॥ ऐतरात्मामिदमेकेअथास्मिन्प्राणएवैकधाभवतीतिचजीवादिलिंगान्नपरइतिचेत्प्रतर्दनविद्यायामेवपरमेतेपूर्वापरयोर्लोचनयावस्तुपरत्वेनश्रितेतदनुगुणतयानेयम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मितिवदन्तीत्येवन्न ।। तर्हि सोऽपरमेपर्ण्यनुसर्वेषु भूतेषु गूढोऽत्मप्रकाशतइत्यादिनाप्रकृतेप्राज्ञेतिनिर्देश्य ।। तमितिज्ञेयउ
च्यते ।। त्रयाणामेवचैवमुपन्यासःप्रश्नश्चोपपत्तेरसोपासनोपन्यासकर्मोत्रयाणामेवास्मिन्प्रकरणेज्ञेयत्वेनोपन्यासःप्रश्न
श्चनप्रधानारेःश्रध्यात्मयोगाधिगमेनदेवंमत्वेत्यादिरुपन्यासःयेयेप्रेतेविचिकित्सामनुष्येअस्तीत्येकेनेत्यादिकश्चप्रश्नः
।। महदुच्च ।। बुद्धेरात्मामहान्परइत्यात्मशब्दाद्यथानुलौकिकोमहान्तथाव्यक्तमपीति ।। चमसवदविशेषात् ।। अजामेकां
हिप्रजासृजमानांसरूपांसृष्टिंकरणत्वेनोक्ताजनभावयोगमात्रेणनतस्याःप्रतीतेः ।। अपांकिलश्चमस
इतिवत्प्रकरणेविशेषकाभावात् ।। यथैवेतास्तिस्रइतिहिचमसविधिव्यतियोगिकशब्दोविशेषप्रतीतिहिविशेषकोपेक्षा
।। ज्योतिरुपक्रमात्तुतथाह्यधीयतएके ।। ज्योतिःवैश्वानरकारणकेवेयमजातथावैश्वानरकारणकायाएवप्रतिपादकेमन्त्रतत्सरू
पेमन्त्रेनैन्द्रिरीयाअधीयतेअग्नेरणीयानित्यारभ्यअतःसमुद्रात्तिरयश्चेत्यादिनासवैस्यवैश्वानरस्यउपस्यात्मनःप्रतिपादनसमये
अजामेकामितिपठन्ति ।। अतस्तत्रापिअजादियंवैश्वानरकारणकेतिनिश्चीयते ।। कल्पनोपदेशाच्चमध्वादिवदविरोधः ।। प्रलयेका
लेनामरूपेविहायाचिद्वस्तुसूक्ष्मरूपेणब्रह्मशरीरंतयातिष्ठतीत्यजा तेनसृष्टिकालेनामरूपेभजमानाप्रकृतिः वैश्वानरकारणका
यथादित्यस्यसृष्टिकालेवस्त्वादिभोग्यरसाधारतयामधुत्वेकार्यत्वंतस्यैवप्रलयकालेमध्वादिव्यपदेशानर्हसूक्ष्मरूपेणावस्था
नमकार्यत्वेनचमधुविद्यायाःप्रतीयते ।। असौवाआदित्योदेवमधुनैवोदेतानासूतमेतंएकंलएवमध्येस्थातेतिसत्कृत् ।। नसंख्यो
पसंग्रहादपिनानाभावादतिरेकाच्च ।। यस्मिन्पंचपञ्चजनाइत्यत्रपञ्चविंशतिसंख्योपसंग्रहादपिनतौत्रिकाण्येतानियस्मिन्निदंय

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Arya Samaj Foundation

तस्यवाक्षरस्यगार्गीत्यादिश्रुतेः॥॥अभिध्योपदेशाच्च॥॥तदैक्षततबहुस्यांप्रजायेयेतिनिमित्तभूतस्येक्षितुर्विचित्रशक्तिरूपज
गदाकारेणात्मनोबहुभवनसंकल्पोपदेशाच्चोपादानमपीतिविज्ञायते॥साक्षाच्चोभयाम्नानात्॥॥ब्रह्मवनंब्रह्मसवृक्षआसीत्
ब्रह्माध्यातिष्ठद्रुधवनातिधारयन्नित्युपादानंनिमित्तंचब्रह्मेतिस्वशब्देनैवोभयाम्नानाच्च॥॥आत्मकृतेः॥सोकामयतेतिनिमित्तभू
तस्यस्वस्यैवजगदाकारेणकृतेस्तदात्मानंस्वयमकुरुतेत्युपरिश्यमानःपरःपुरुषोजगन्निमित्तंचोपादानंचेतिविज्ञायतेपरस्य
ब्रह्मणोनिरवद्यत्वंसत्यसंकल्पत्वादस्तहिपरीतानांपुरुषार्थश्रुजगदाकारेणात्मकृतेश्रविरोधःकथमित्याशंक्याह॥परिणा
मात्॥॥अत्रोपरिश्यमानात्परिणामादविरोधएव अविभक्तनामरूपातिसूक्ष्मचिदचिद्वस्तुशरीरकःकारणावस्थःपरःपुरुषःस्वय
मेवसोकामयतबहुस्यांप्रजायेयेतिविभक्तनामरूपश्चिदचिद्वस्तुशरीरोभवेयमितिसंकल्प्यइदंसर्वंससृजतयदिदंकिंचेतिस्वशरीरभू
तमितिसूक्ष्मचिदचिद्वस्तुस्वसमाहिभक्तेचिदचिद्वस्तुनिस्वयमेवात्मतयाप्रविश्यसच्चत्यच्चाभवत्॥निरूपंचानिरूपंचनिलयनंचानि
लयनंचविज्ञानंचाविज्ञानंचसत्यंचानृतंचसत्यंसमभवदितिहिस्वस्यबहुभवनरूपपरिणामउपदिश्यतेअतोनकश्चिद्विरोधः॥
अविभागाद्वस्यायमपित्रीवस्तुकर्मचसूक्ष्मरूपेणचेतिकृतीतिचवक्ष्यति॥नकर्माविभागादितिचेन्नानादित्वादुपपद्यतेचाप्युपल
भ्यतेचेति॥॥यानिक्वाहिगीयन्ते॥॥यद्भूतयोनिमित्यादिषुयोनिशब्दोगीयते॥अतश्चोपादानमपि॥॥एतेनसर्वेव्याख्याताःव्याख्याताः॥॥जन्मा
द्यस्ययतइत्यादिनैतरत्नेनन्यायेनसर्वेवेदान्तावाक्यब्रह्मपरायाव्याख्याताः॥हिरुक्तिरध्यायपरिसमाप्तिद्योतनायः॥ॐइतिश्रीभगवद्रा
मानुजविरचितेवेदान्तसारेप्रथमस्याध्यायस्यचतुर्थपादः॥ॐ॥ स्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाश

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न्यलिंगमिति ।। अत्रार्थेऽन्यु जैमिनिः प्रश्नप्रतिवचनाभ्यामपि चैवमेके ।। तौह सुषुपुरूषमाजगमतु रित्यादिना देवतेतिरिक्तजीवसद्भावप्रतिपादनेतरेतरि
रिक्तपरमात्मसद्भावज्ञापनार्थमिति केचिदत्र व्याख्यानयन्ति तदप्रश्नार्थात्मिन्प्राणएवैकधा भवतीतिवाक्यसमानार्थतात्प्रतिवचनाच्चगम्य
तेएके वाजसनेयिनोपेतत्प्रतिवचनसमानार्थं वाक्यं स्वशाखायामधीयतेच कैश्चरणैरित्यादि यएषोन्तरहृदयआकाशस्तस्मिन यच्छेतदमृतंसेरे ।।
वाक्यान्वयात् ।। नवाप्रेरेपत्युः कामायपतिः प्रियोभवत्यात्मनस्तुकामायेत्यारभ्यात्मावाअरेद्रष्टव्यइत्यादिनोयदिदंपरमात्मामत्तत्वस्य
तुनाशप्राप्तिविनैनेत्यारभ्यात्मनिखल्वरेदृष्टऋश्रुतेमतेविज्ञातइदंसर्वंविदितमित्यादियेनेदंसर्वंविजानातीत्यन्तस्यैकत्वस्यपरमात्मनो
वान्वयात् ।। अस्मिन्प्रकरणप्रकरणान्तरेचजीवशब्देनपरमात्मनोभिधानेतत्सामानाधिकरण्येचकारणंमतान्तरेणाह ।। प्रति
ज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ।। आत्मनिखल्वरेदृष्टेश्रुतेमतेइत्यादिनापरमात्मज्ञानेनप्रतिज्ञासिद्धयेजीवस्यतत्कार्यतयास्मादनतिरिक्त
त्वंचापादयंजीवशब्देनपरमात्माभिधानम् ।। उत्क्रमिष्यतएवंभावादित्योडुलोमिः ।। उत्क्रमिष्यतोमुक्तस्यपरमात्मस्वरूपभावादात्मशब्द
नमित्योडुलोमिः ।। अवस्थितेरितिकाशकृत्स्नः ।। यद्यात्मनितिदृष्टान्तोनात्मनोन्तरइत्यादिनाजीवात्मनोपरमात्मनश्चात्मतयावस्थिते
रितिकाशकृत्स्नः आचार्योमन्यतेइदमेवमतंसूत्रकारःस्वयमेवस्वीकृतवानितिमतद्वयमुपन्यस्यतद्विरोधेतदभिधानाश्रितनिश्ची
यते ।। प्रकृतिश्चप्रतिज्ञादृष्टान्तानुपरोधात् ।। जगतउपादानकारणमपिपरंब्रह्मनिमित्तंस्तद्धीस्युततमादेशमप्राक्षः येनाश्रु
तंश्रुतंभवतीतियेनादृष्टंमतंविज्ञातंभवतीत्यादिश्रुतेतत्प्रतिज्ञानेनसर्वविज्ञा
नप्रतिज्ञानतदुपपादनरूपमुक्तार्थदृष्टान्तानुरोधात् आदित्यश्चेतनेनेत्यादिश्रुतेश्चैतदभीयते ।। आदित्यश्चेतनप्राणसनेमे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Shastra Peetham

त्वयुक्तत्वस्यविरत्वादिभावेपिबालत्वादयःशरीरेतिछन्ति ज्ञानसुखादयश्चात्मन्येवतद्रूपत्वात्पिशरीरभूतंचिरंचिद्रूपतान्यज्ञानविकारानिछन्ति यतस्तेतुब्रह्मणोनित्यनिरवद्यत्वादिकारत्वमात्रेणज्ञस्यैकल्पादयः॥ स्वपक्षदोषाच्च॥ प्रधानकारणवादेदोषाच्चायमेवग्राह्यःप्रधानकारणवादेहिनिर्विकारपुरुषसंनिधानात्प्रकृतिप्रवृत्तावितरेतरधर्माध्यासादयोदुरुपपादाः। अन्यत्रान्यधर्मानुसंधानरूपोध्यासोनिर्विकारपुरुषस्यनसंभवति अचेतायाःप्रकृतेरनुसंधानरूपोध्यासएवतरांनसंभवति॥ तर्काप्रतिष्ठानादपि॥ प्रधानकारणवादस्यतर्कमूलत्वेनतस्याप्रतिष्ठितत्वादित्याद्यंप्रधानम्॥ अन्यथानुमेयमितिचेदेवमप्यनिर्मोक्षप्रसंगः॥ लक्षणैःप्रकारान्तरेणप्रधानमनुमेयमितिचेदेवमपितर्काधिकतर्कैकुशलसंभावनयाऽप्रतिष्ठितत्वादनिर्मोक्षप्रसंगोदुर्वारः॥ एतेनशिष्टापरिग्रहाअपिव्याख्याताः॥ एतेनसांख्यस्मृतिनिवारणेहेतुनातर्कप्रतिष्ठानत्वादिनाऽवशिष्टाःकणभक्षाक्षपादपतञ्जलिकारिस्मृतयोनिरस्ताः॥ भोक्त्रापत्तेरविभागश्चेत्स्यात्लोकवत्॥ यदिचिदचिद्वस्तुशरीरकत्वेब्रह्मणोपिसशरीरत्वमिष्यतेतर्हिजीववत्सशरीरत्वेनब्रह्मणोपिसशरीरत्वसंबन्धप्रयुक्तसुखदुःखभोक्तृत्वापत्तेर्जीवादविभागप्रसक्तेरितिचेन्नस्यादेवजीवाद्धिभाद्धिभागोनिरवद्यकल्याणगुणाकरत्वेनब्रह्मणः नहिशरीरप्रयुक्तमनिष्टंभोक्तृत्वमपित्वनधश्चत्सतेमयालोकेराज्ञःसशरीरत्वेपिनत्यवशवर्तिस्वज्ञातिदुःखतन्निष्टभोक्तृत्वेनेतरसामान्यं॥ तदनन्यत्वमारंभणशब्दादिभ्यः॥ कारणभूताद्ब्रह्मणोऽनन्यत्वंकार्यभूतजगतोवाचारंभणशब्दादिभ्योवाक्येभ्योवगम्यते वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं सर्वसामेदमग्रआसीदेकमेवाद्वितीयंतदैक्षततदबहुस्यांप्रजायेयेतिएतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसीत्यादिभ्यः॥ भावेचोपलब्धेः॥ घटादिकार्यंभोक्तृदेवेदमग्र व्यभित्युपलब्धेश्चकारणादनन्यत्वंकार्यस्य॥ सत्वाच्चापरस्य॥ कार्यस्यकारणसत्वाच्चतस्मादनन्यत्कार्यंघटशरावादिकंपूर्वंमृदेवासीदित्यादि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दोषप्रसंगात्।। उपबृंहणपिप्सवे दान्तार्थो निश्चयेसति कपिलस्मृत्युपबृंहणेनवेदांतार्थो नोपबृंहणीयः कारणवादस्यनभ्युपग
मेकपिलस्मृत्युपबृंहणानन्वयेनानवकाशप्रसक्तिरितिचेत्। जन्मादिसूत्रवेदविरोधिनांवहूनांमन्वादिस्मृतीनांमननवकाशप्र
सक्तेः वेदस्योपबृंहणापेक्षत्वेनमननपरानेकाविरुद्धस्मृतीनुसतीनुविरुद्धार्थायावेदादितार्थविशदीकरणलाभेनतस्याउपबृंहणा
लंभन्याय्यमित्यर्थः योगींद्रकपिलस्यतथानुपलब्धेरतस्याप्यमितिचेन्नतद्वाह।। इतरेषांचानुपलब्धेः।। वेदार्थसाक्षात्कारमन्वादि
योगींद्राणांकपिलदृष्टार्थानुपलब्धेः कपिलोपलब्धिभ्रमेणव।। एतेनयोगः प्रत्युक्तः।। योगस्यहिरण्यगर्भस्यापिकापिलवद्दृष्टविरु
द्धाविशेषांशनिरासः।। नविलक्षणत्वात्स्यतथात्वंचशब्दात्।। विकारास्यदृष्टेनाज्ञातेनापुरुषार्थोऽप्रयोजनेनाज्ञातोबुद्धवि
लक्षणत्वात्कार्यत्वेनसंभवति।। विलक्षणत्वेशब्दाच्चावेगम्यतेऽविज्ञानंचाविज्ञानंचेत्यादेः।। अभिमानिव्यपदेशस्तुविशेषानुगति
भ्याम।। तंदर्शयितुंब्रवीति।। अपेक्षाप्रकाशयन्तेत्यादिज्ञानकार्यव्यपदेशस्तत्तदभिमानिदेवताविषयमितिहन्तारमिमंमन्यसेहंत
प्रतिषेधमात्रत्वात्।। एवंतर्हिकारणेकार्यमसदितिचेन्न सालक्षण्यात्।। नियमप्रतिषेधमात्रत्वात्।। पूर्वोक्तकार्यकारणयोर्व
स्तुनिष्ठप्रसंगाद्दृष्टान्तवाक्यमसमंजसंस्यात्।। नतु दृष्टान्तभावात्।। नैतत्। यस्यात्माशरीरेयस्यायंशरीरंइत्यादिश्रुतिसिद्धचिद
चिद्वस्तुशरीरस्यब्रह्मणः कार्यकारणभावेनावस्थाने गुणदोषव्यवस्थितेर्दृष्टांतसंज्ञावात्। यथासशरीरस्यमनुष्यस्यगौणो वाले

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वानुपपत्तिः सिद्धैवेत्यर्थः ॥ १ ॥ उपसंहारदर्शनान्नेति चेन्नक्षीरवद्धि ॥ १ ॥ कार्यनिष्ठत्वावनेकाकारोपसंहारदर्शनात् वृक्षैकमेव
जगदाकारकार्यं न भवेदिति चेन्न ॥ क्षीरस्यैकस्यैव दधिभाववत् वृक्षस्यापि संभवति ॥ १ ॥ देवादिवदपि लोके ॥ १ ॥ यथा देवानांशा
स्त्रावगतप्राप्तेः स्वसंकल्पादेवस्य लोके स्वापेक्षितनानारूपभावः एवं वृक्षस्यापि शास्त्रावगतेः प्राप्तेः सर्वमुपपन्नम् ॥ १ ॥ कृत्स्न
प्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ १ ॥ चिदचिदात्मशरीरकं ब्रह्मैव कार्याकारेणावस्थितमिति युक्तं तत्र ब्रह्मणोऽशरीरत्वेनानिरव
यवत्वशब्दकोपः स्यात् ॥ अतो वृक्षवन्नकारणपरिहरति ॥ १ ॥ श्रुतेस्तुशब्दमूलत्वात् ॥ १ ॥ श्रुतिप्रामाण्यान्नैवं प्रसज्यते शब्दैकप्रमाणकै
त्वाद्ब्रह्मस्वरूपस्य सकलेतरप्रमाणागोचरवस्तुविसजातीयत्वेन तत्रतत्रोक्तशक्तियोगो वृक्षवन्नविरुद्धः ॥ अत्रकोऽर्थस्तेनका
रणेनचपरिपूर्णस्यैवावस्थानंसंभवति ॥ यथाजातिवादिनोजातेःस्वेऽनुगुणादिषु ॥ आत्मानंचैवं विद्धित्राह्मणेति ॥ जीवात्मनिवाव
चिदंशेविरुद्धैर्धर्मयोगो विसजातीयशक्तियोगस्त्वादेवाग्निनजलादेर्योग्यचिद्विशेषअन्येस्मिन्विलक्षणानियतशक्तियोविचि
त्रोदृष्टएवेति ॥ स्वपक्षदोषाच्च ॥ कृत्स्नप्रसक्त्यादयोनिरवयवेचिदंशेसुसजातीयेप्रधानएवेति वृक्षैवकारणम् ॥ सर्वोपेताचतद्द
र्शनात् ॥ पराऽस्यशक्तिर्विविधैवश्रूयतेइतिश्रुतेः सर्वशक्तियोगश्रवणाच्चाऽवगम्यते विकारएवत्वान्नेतिचेन्नतदुक्तम् ॥ मतस्ये
कार्यीकरणंचविद्यतेरतिर्ब्रह्मणोविकारएवत्वात्कारणेनेतिचेन्नतस्यैवनरेशब्दैकमूलत्वेनविसजातीयत्वात्तदैसजात्यंब्रह्मैव ॥ नप्रयोजनव
त्वात् ॥ वृक्षवोऽवश्यकामस्वेनसृष्टिप्रयोजनाभावान्नब्रह्मकारणम् ॥ लोकवत्तुलीलाकैवल्यम् ॥ अपवर्गकामस्यापिसृष्टिप्र
योजनेरप्यस्यसंभवति ॥ लोकेकेवलंलीलायैकेडुकादारंभदर्शनात् ॥ पुरुषस्यात्मप्रसादात्मकामंकेचित् ॥ सदाभिमतमस्यकलभोगोपकरणः
सद्भावः आत्मतोभोगदृष्टिविसजातीयलीलारसस्यापिनरिलक्षणस्यविरोधाभावात्करणेनित्यमेव ॥ वैषम्यनैर्घृण्येनसा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Foundation

दितिहेत्वादिरसालम्बोपलभ्यते ॥ अथ हेत्वादेरप्यालम्बनेति चेन्नधर्मान्तरेणावाक्शेषाद्युक्तेः शब्दान्तराच्च ॥ २ ॥ वाग्नैवकिञ्चनाशी
दिति काण्वीस्मृतिरप्यनेनैव प्रत्युक्तेत्यर्थः ॥ ननु छान्दोग्यकारणवाक्यमसदिति नेत्यस्यूलत्वविरोधिसूक्ष्मत्वरूपधर्मान्तरयोगादूक्ष्मत्व
व्यपदेशः कुतः तदसदेवसन्मनोऽकुरुतेत्यस्मिन्निति वाक्शेषादवगम्यते मनस्कारोहि विद्यमानस्यैवयुक्तोऽसद्रूप
देशः धर्मान्तरयोगनिमित्तश्चेतिगम्यतेघटत्वकपालत्वादिभिःपरस्परविरोधिभिर्भावरूपैर्धर्मैःप्राङ्नास्मित्व
वैकदानीमस्तिकरभविष्यतीतिचेति सदविद्यमानस्यैवमृद्व्यस्यसदित्यपदेशः तथाशब्दान्तरंचतेऽतर्थ
यासक्तमासीदित्यादि ॥ षष्ठस्तु तंतवएवसेयोगविशेषभाजः प्रेष्टतिनामान्तराण्यिकेभजन्तेतद्वदिहापि ॥ यथाचप्रा
णादित्तकारणादिदोषप्रसक्तिः ॥ तत्वमस्यत्वमात्मावैसेतिकार्यभूतस्यजीवस्यवैसभावव्यपदेशात् ॥ अनन्यत्वमुक्तंएवं
तर्हि सर्वज्ञस्यसत्यसंकल्पस्यवशएव आत्मनोहिताकरणमहितकरणंचत्यादिदोषप्रसक्तिःनैतत् ॥ प्रधिकंतुभेदनिर्देशात् ॥
कार्यकारणयोरनन्यत्वेपिजीवस्वरूपाद्ब्रह्मस्वरूपमर्थान्तरंकरणाधिपाधिपः विद्यावेदेशतेयमुसोम्यः इत्यादिभिनि
र्देशाद्विरुद्धधर्मवत्तुशरीरंवैसेवकारणवस्यंकार्यावस्थमितिगुणदोषव्यवस्थितिः ॥ ननुदृष्टान्तभावादिति चुक्तायस्यपरोक्षतीयादि
रंयस्यात्माशरीरमित्यादिश्रुतिशतेभ्यधिगतंचिदचिद्वस्तुशरीरत्वम् ॥ अथादिवच्चतदनुपपत्तिः ॥ अथमतंछान्दोग्यतएव
देवचेतनस्यैवजीवस्यानीशयाशोचतिमुह्यमानइत्यादिनात्यतविसजातीयतयाभिहतस्यसर्वज्ञत्वसत्यसंकल्पवत्वस्वरूपभा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Digitized by eGangotri

Acc. No. 196
श्रीशारदा संस्कृत विद्यापीठ
दरभंगा

विद्यालङ्कृतग्रन्थः

वेदान्तसारसमुच्चयः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham